श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ श्री द्वादशस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री द्वादशस्तोत्रम् ॥

नमो नमो नृसिंहाय मालोलाय नमो नमः।
नमो नमस्स्वर्णरमानृसिंहाय नमो नमः॥ 1 ॥

नमो नमो मङ्गळाद्रिनृसिंहाय नमो नमः।
नमो नमो नृत्ततुष्टश्रीकृष्णाय नमो नमः॥ 2 ॥

नमो नमश्शेषशायिरङ्गिणे च नमो नमः।
नमो नमो हस्तिशैलकल्पकाय नमो नमः॥ 3 ॥

नमो नमश्शेषशैलश्रीवासाय नमो नमः।
नमो नमो यादवाद्रिनिवासाय नमो नमः॥ 4 ॥

नमो नमस्सौरभाढ्यरङ्गिणे च नमो नमः।
नमो नमो रमाश्लिष्टवराहाभ्यां नमो नमः॥ 5 ॥

नमो नमो ज्ञानदाय वागीशाय नमो नमः।
नमो नमो भूरमादिकेशवाय नमो नमः॥ 6 ॥

नमो नमो दीप्तरश्मिचक्राय च नमो नमः।
नमो नमस्सगोदाय रङ्गिणे च नमो नमः॥ 7 ॥

नमो नमो जानकीशलक्ष्मणाभ्यां नमो नमः।
नमो नमोऽनन्तसुधामूर्तये च नमो नमः॥ 8 ॥

नमो नमो नृसिंहादिश्रीमूर्तिभ्यो नमो नमः।
नमो नमो विष्णुपादशठारिभ्यां नमो नमः॥ 9 ॥

नमो नमोऽनीकनाथशठजिद्भ्यां नमो नमः।
नमो नमो कलिध्वंसयतीन्द्राभ्यां नमो नमः॥ **10** ॥

नमो नमो वेदचूडागुरवेऽस्तु नमो नमः।
नमो नमो वण्शठारियतीन्द्राय नमो नमः॥ **11** ॥

नमो नमस्तदाज्ञप्तयतीन्द्रेभ्यो नमो नमः।
नमो नमो वीररघ्वीड्यतीन्द्राय नमो नमः॥ **12** ॥

रमानृसिंहभक्तस्य वेदचूडागुरोर्यतेः।
कृतिरेषा चिरं जीयात् पद्यैः द्वादशभिर्युता॥ **13** ॥

॥ इति श्री द्वादशस्तोत्रम् समाप्तम् ॥